स्टेज II

# प्रतिदर्श
# प्रश्न-पत्र 3

व्याख्या सहित (प्रश्न–उत्तर)

# संस्कृतम्

*CBSE कक्षा 10 की परीक्षा के लिए नमूना प्रश्न-पत्र*

---

**कालावधि** : होरात्रयम् **पूर्णाङ्काः 80**

**निर्देशाः** 1. अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।
2. भागः 'अ' : बहुविकल्पात्मकः प्रश्नाः (40 अङ्काः) अस्ति।
3. भागः 'आ' : वर्णनात्मकः प्रश्नाः (40 अङ्काः) अस्ति
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
5. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयः।

## भागः 'अ' : बहुविकल्पात्मकाः प्रश्नाः (40 अङ्काः)

### अनुप्रयुक्त-व्याकरणम्

**(25 अङ्काः)**

**1.** अधोलिखित वाक्येषु रेखाङ्कितपदानां सन्धिपदं/संधि-विच्छेदं पदं वा चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1 × 4 = 4 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पदों के संधिपद अथवा संधि-विच्छेद पद चुनिए।) (केवल चार प्रश्न)*

*(i)* जगत् + नाथः चतुर्भुजो अस्ति।
(क) जगन्नाथः (ख) जगत्नाथः (ग) जगनाथम्

*(ii)* धनञ्च सर्वं लभे।
(क) धनं + जयः (ख) धनं + च (ग) धन + चम्

*(iii)* तत् + श्रुत्वा सः धावति।
(क) तत्श्रुत्वा (ख) तश्रुत्वा (ग) तच्छ्रुत्वा

*(iv)* कश्चित् जनः शनैः चलति।
(क) कः + चित् (ख) कम् + चित् (ग) कष् + चित्

*(v)* छात्रः निष्दुरः अस्ति।
(क) निश् + दुर (ख) निः + दुरः (ग) निस् + दुर

**2.** अधोलिखित वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1× 4 = 4 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनिए।) (केवल चार प्रश्न)*

*(i)* द्रोणपुत्रः अश्वत्थामा आसीत्।
(क) द्रोणस्य पुत्रः (ख) द्रोणाय पुत्रः
(ग) द्रोणात् पुत्रः

*(ii)* मातापितरौ पूजनीयौ।
(क) माता च पिता च (ख) माता-पिता
(ग) पिता माता

*(iii)* सः कृष्णभक्तः अस्ति।
(क) कृष्णस्य भक्तः (ख) कृष्णम् भक्तः
(ग) कृष्णाय भक्तः

*(iv)* शरणागतस्य रक्षां कुरु।
(क) शरणम् आगतस्य (ख) शरणा आगतस्य
(ग) शरणाम आगता

*(v)* श्रीरामःमृगस्य पश्चात् धावति।
(क) उपमृगम् (ख) अनुमृगम्
(ग) प्रतिमृगम्

**3.** अधोलिखित वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1× 4 = 4 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति-प्रत्ययों को जोड़कर अथवा अलग करके उचित उत्तर विकल्पों में से चुनिए।) (केवल चार प्रश्न)*

*(i)* श्रद्धा + मतुप् ज्ञानं लभते।
(क) श्रद्धावान् (ख) शृद्धवानम्
(ग) श्रद्धायामं

*(ii)* मनुष्य जीवने परिश्रमस्य महत्त्वं भवति।
(क) महतवं + त्वं (ख) महत् + त्वं
(ग) महता + त्व

*(iii)* गुण + मतुप् सर्वत्र पूज्यते।
(क) गुणाः (ख) गुणवान्
(ग) गुणमतुप

*(iv)* बालिकया माता चतुर + टाप् अस्ति।
(क) चतुरतमा (ख) चतुरतरा
(ग) चतुरा

*(v)* वीर + त्व पुरुषस्य भूषणम्।
(क) वीरत्व (ख) वीरता
(ग) वीराः

**4.** वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। *(केवलं प्रश्नत्रयम्)* (1× 3 = 3 अङ्काः)

*(वाच्य के नियमानुसार उचित विकल्प चुनिए।) (केवल तीन प्रश्न)*

*(i)* रमा–सीते! त्वं कुत्र ………… ? (गम्)
(क) गम्यते (ख) गम्येते
(ग) गम्यन्ते

*(ii)* सीता–रमे! मया ……… गम्यते। (विद्यालय)
(क) विद्यालयात् (ख) विद्यालयं
(ग) विद्यालयः

*(iii)* रमा-किं त्वं तत्र संस्कृतं ………? (पठ्)
(क) पठन्ति (ख) पठति
(ग) पठसि

*(iv)* सीता–आम् ……… तत्र संस्कृतम् पठ्यते। (अस्मद्)
(क) मया (ख) वयं
(ग) तव

**5.** प्रदत्तविकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1× 4 = 4 अङ्काः)

*(दिए गए विकल्पों में से उचित कालबोधक शब्द चुनिए।) (केवल चार प्रश्न)*

*(i)* मैट्रोरेलयानं (9:00 प्रातः) ……. वादने शहादरा मैट्रोरेलस्थाने तिष्ठति।
(क) नव (ख) सपादनव
(ग) सार्द्धनव

*(ii)* एतत् (9:15) …… वादने कश्मीरीगेट आगच्छति।
(क) सार्द्धनव (ख) सपादनव
(ग) नव

*(iii)* एतत (9:30) …… वादने तीस हजार्याम् आगच्छति।
(क) पादोननव (ख) सपादनव
(ग) सार्द्धनव

*(iv)* एतत् (11:45) ……. वादने रिठालारेलयानस्थाने आगमिष्यति।
(क) पादोनद्वादश (ख) द्वादश
(ग) सपादद्वादश

*(v)* एतत् 12:30 ……. वादने आनन्दविहार स्थाने आगच्छति।
(क) सपादद्वादश (ख) सार्द्धद्वादश
(ग) द्वादश

**6.** वाक्यानुगुणम् उचिताव्ययपदं चिनुत। *(केवलं प्रश्नत्रयम्)* (1× 3 = 3 अङ्काः)

*(वाक्यों के अनुसार उचित अव्यय पद चुनिए।) (केवल तीन प्रश्न)*

*(i)* त्वं तत्र पश्य, उपवने महिलाः ……… भ्रमन्ति।
(क) अपि (ख) वृथा
(ग) अत्र

(ii) कच्छपः तु ········· चलति।
(क) अत्र (ख) शनैः
(ग) कदा

(iii) अहं ········· समयं न यापयामि।
(क) श्वः (ख) कदा
(ग) वृथा

(iv) वानराः ········· कूर्दन्ति।
(क) इतस्ततः (ख) अत्र
(ग) अपि

**7.** अधोलिखित वाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत। *(केवलं प्रश्नत्रयम्)* (1× 3 = 3 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध हैं। शुद्ध पद विकल्पों में से चुनिए।)(केवल तीन प्रश्न)*

(i) द्वौ छात्रौ <u>गच्छति</u>।
(क) गच्छतः (ख) गच्छति
(ग) गच्छन्ति

(ii) <u>सः</u> बालिका भोजनं खादति।
(क) ताः (ख) सा
(ग) तेन

(iii) <u>अहं</u> पत्रं लिखावः।
(क) युवाम् (ख) सः
(ग) आवाम्

(iv) रामः अतीव <u>वीराः</u> अस्ति।
(क) वीरः (ख) वीरम्
(ग) वीरौ

## पठित-अवबोधनम् (15 अङ्काः)

**8.** रेखाङ्कितपदानां आधृत्य प्रश्नवाचकं पदं चिनुत। *(केवलं प्रश्नपञ्चमम्)* (1× 5 = 5 अङ्काः)

*(रेखांकित पदों के आधार पर प्रश्नवाचक पद चुनिए।) (केवल पाँच प्रश्न)*

(i) गहनकानेन सा <u>व्याघ्रं</u> ददर्शः।
(क) कं (ख) कः
(ग) का

(ii) भयाकुलः <u>व्याघ्रः</u> पलायितः।
(क) कौ (ख) कः
(ग) कानि

(iii) सा <u>राजसिंहस्य</u> भार्या आसीत्।
(क) कौ (ख) काम
(ग) कस्य

(iv) <u>व्याघ्रमारी</u> तूर्णं धाविता।
(क) कुत्र (ख) कस्मिन्
(ग) का

(v) सा <u>पितुर्गृहं</u> चलिता।
(क) कुत्र (ख) कदा
(ग) का

(vi) राजसिंहः <u>देऊलग्रामे</u> वसति स्म।
(क) कदा (ख) कया
(ग) कुत्र

**9.** अधोलिखित वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1× 4 = 4 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पदों के प्रसंगानुकूल उचित अर्थ चुनिए।) (केवल चार प्रश्न)*

(i) <u>पुत्रस्य</u> दैन्यं दृष्ट्वा अहं रोदिमि।
(क) दीनतां (ख) सुतस्य
(ग) दीनं

(ii) दीनस्य तु सतः <u>शक्रः</u>।
(क) इन्द्रः (ख) कृषकः
(ग) वृषभः

(iii) सः <u>शरीरेण</u> दुर्बलः आसीत्।
(क) सुबलः (ख) सा
(ग) देहेन

(iv) <u>जननी</u> तुल्या वत्सला भवति।
(क) भ्राता (ख) माता
(ग) पिता

(v) अस्मिन् पुत्रे विशिष्य आत्म <u>वेदनाम्</u> अनुभवामि।
(क) पीडाम् (ख) प्रसन्नताम्
(ग) वेदानाम् ज्ञानम्

**10.** भाषिककार्यसम्बद्धानां प्रश्नानाम् समुचितम् उत्तरं विकल्पेभ्यः चिनुत। *(केवलं प्रश्नषट्कम्)* (1× 6 = 6 अङ्काः)

*(भाषिक कार्य से सम्बन्धित प्रश्नों के उचित उत्तर विकल्पों में से चुनिए।) (केवल छः प्रश्न)*

(i) 'अपमानम्' इति पदस्य विलोमपदं किम्?
(क) सम्मानम् (ख) अपमानम्
(ग) स्वाभिमानम्

(ii) 'स्वपक्षं' इति पदस्य पर्यायपदं किम्?
(क) निजपक्षं (ख) शवं
(ग) वर्णनम्

(iii) 'चोरितायाः मञ्जूषायाः' अनयोः पदयो विशेष्यपदं किम्?
(क) मया (ख) मञ्जूषायाः
(ग) त्वया

(iv) 'यादुक्तं वर्णयामि' अत्र क्रियापदं किम्?
(क) अध्वनि (ख) यादुक्तं
(ग) वर्णयामि

(*v*) 'अश्वा:' इति पदस्य पर्यायपदं किम्?

(क) हया: (ख) नागा:

(ग) पण्डिता

(*vi*) 'मूर्ख:' पदस्य विलोमपदं किम्?

(क) जन: (ख) पण्डित:

(ग) नागा:

(*vii*) 'पण्डित: जन:' अत्र विशेषणपदं किम्?

(क) पण्डित: (ख) जन:

(ग) पण्डितजन:

(*viii*) 'त्वं वर्षत्रयस्य कारादंडं लप्स्यसे' अस्मिन् वाक्ये क्रियापदं किम्?

(क) लप्स्यसे (ख) दंडं

(ग) त्वं

# भाग: 'आ' : *वर्णनात्मका: प्रश्ना: (40 अङ्का:)*

## अपठित–अवबोधनम्

(10 अङ्का:)

**11.** अधोलिखित गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

*(निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)*

अस्माकम् उपरि वर्तते विशाल: आकाश:। आकाशस्य अंत: न अस्ति। अत: आकाशम् अनन्तम् अपि वदन्ति। तत्र असंख्यानि नक्षत्राणि सन्ति। आकाशे सूर्य:, चंद्र:, भौम:, बुध:, गुरु, शुक्र:, शनि: च सप्त ग्रहा: सन्ति। निशायां चंद्रस्य उदय: भवति। तस्य प्रकाश: शीतल: अस्ति। स: सूर्यात् प्रकाशं विन्दति। पूर्णिमायां चन्द्रस्य बिम्बं वर्तुलं भवति। क्रमेण तत् क्षयति। अमावस्यायाम् आकाशे तस्य अंश: अपि न भवति। शुक्लपक्षे चंद्र: क्रमेण वृद्धिं गच्छति कृष्णपक्षे क्रमेण क्षयति च। जना: चंद्रस्य प्रकाशं ज्योत्सनां चंद्रिकां इति च वदन्ति। चंद्रस्य विधु: सुधाकर:, औषधीश:, निशापति: च इति अनेकानि अभिधानानि सन्ति। रात्रौ आकाशे तारा: दिव्यन्ति। ते अस्मत् अति दूरे सन्ति।

I. एकपदेन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($1 \times 2 = 2$ अङ्का:)

*(एक पद में उत्तर लिखिए।) (केवल दो प्रश्न)*

(*i*) आकाशस्य किं नास्ति?

(*ii*) चंद्रस्य उदय: कदा भवति?

(*iii*) आकाशम् किं वदन्ति?

II. पूर्णवाक्येन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($2 \times 2 = 4$ अङ्का:)

*(पूर्णवाक्य में उत्तर लिखिए।) (केवल दो प्रश्न)*

(*i*) अस्माकं उपरि क: वर्तते?

(*ii*) चंद्रस्य प्रकाशं किं वदन्ति?

(*iii*) आकाशे असंख्यानि किं सन्ति?

III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। *(द्वित्रिशब्दात्मक-वाक्यम्)* (1 अङ्क)

*(इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।) (दो–तीन शब्द का वाक्य)*

IV. यथानिर्देशम् उत्तरत। *(केवलं प्रश्नत्रयम्)* ($1 \times 3 = 3$ अङ्का:)

*(निर्देशानुसार उत्तर दीजिए।) (केवल तीन प्रश्न)*

(*i*) गृहा: इति पदस्य विशेषणं गद्यांशात् चित्वा लिखत।

(क) शनि (ख) सप्त

(ग) सूर्य

(*ii*) 'दिवसे' इति पदस्य विलोम पदं किम्?

(क) दिनम् (ख) अमावस्यायाम्

(ग) निशायां

(*iii*) 'ते अस्मत् अति दूरे सन्ति' अत्र 'सन्ति' क्रियापदस्यकर्तृपदं किम्?

(क) कोऽपि (ख) ते

(ग) अति दूरं

(*iv*) 'विस्तृत:' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(क) विशाल: (ख) आकाश:

(ग) सूर्य:

## रचनात्मक-कार्यम् (15 अङ्काः)

**12** शुल्कमुक्त्यर्थं स्वप्रधानाध्यापकाय लिखितमिदं प्रार्थनापत्रम् मञ्जूषात् उचित पदैः चित्वा पूरयत्। ($\frac{1}{2}$ × 10 = 5 अङ्काः)

*(शुल्कमुक्ति के लिए अपने प्रधानाचार्य को लिखे गए प्रार्थना-पत्र को मञ्जूषा से उचित शब्द चुनकर पूरा कीजिए।)*

सेवायाम्

श्रीमन्त *(i)*......... महोदयाः

प्रताप उच्च माध्यमिक विद्यालयः

*(ii)*.......... ।

**विषयः** शुल्कमुक्त्यर्थं प्रार्थना-पत्रम्।

महोदयाः,

*(iii)*.........निवेदनमस्ति यदहं *(iv)*......... विद्यालये दशम्यां कक्षायां *(v)*.........। मम *(vi)*......... आर्थिकदशा समीचीना नास्ति। निर्धनता कारणात् मम पिता मदीयं विद्यालय शुल्क प्रदानार्थं सक्षमो नास्ति, किन्तु मम अध्ययनस्य *(vii)*......... वर्तते। गतवर्षेऽपि छात्रकल्याणकोषतः सहायतां प्राप्य मया अध्ययनं विहितम्। अत एव *(viii)*......... वर्तते यन्मम निर्धनतां स्वाध्ययने च रूचिं *(ix)*.........शिक्षणशुल्कात् सर्वथामुक्तिं प्रदास्यान्ति श्रीमन्तः।

भवदाज्ञाकारी शिष्यः

*(x)*......... कक्षा-दशमी

**मञ्जूषा** विलोक्यः, भवतां, प्रार्थना, रूचिः, परिवारस्य, श्यामः, अमृतसरः, प्रधानाचार्यः, सविनयं, पठामि।

**13.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। (1 × 5 = 5 अङ्काः)

*(नीचे दिए गए चित्र को देखकर मञ्जूषा में दिए गए शब्दों की सहायता से पाँच वाक्य संस्कृत में लिखिए।)*




**मञ्जूषा** सर्वे, जनाः, क्षेत्रे, रोगस्य, अस्य, प्रयत्नरताः, सन्ति, औषधि, प्रयोगशालासु, निर्माण, कार्य, प्रयोगाः, जनानां, मुखं, कर्पटाच्छादितं, बचावकर्त्तु, वायरसः, कोरोना, प्रभावः, दृश्यते, दृश्यन्ते, चित्रे, अस्मिन्।

*अथवा*

'भारतदेशं' इति विषयम् अधिकृत्य मञ्जूषायां पदत्त शब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। (1 × 5 = 5 अङ्काः)

*('भारतदेश' इस विषय को आधार मानकर मञ्जूषा में दिए गए शब्दों की सहायता से पाँच वाक्य संस्कृत में लिखिए।)*

**मञ्जूषा** प्रतिवसन्ति, प्राचीनदेशः, कर्त्तव्यम्, एकसूत्रबद्धा, विविधानि, दर्शयन्ति, आचाराः, विचाराः, सर्वे, सुदृढ़, प्रतिरूपेण, अत्र, बहुविधा, अनेकाः, एकः, भाषाः, मतयुक्ता, निवसन्ति, अनेकाः धर्माः, जनाः, सांस्कृतिक, एकता, प्रतिरूपेण, प्रतिवसन्ति, भारतीयः, वयं, प्रथमम्, भावना, अस्माभिः, देशं गर्वं, भारतः, अस्ति, स्म, भारतं।

**14.** अधोलिखित वाक्यानाम् संस्कृतभाषायां अनूद्य लिखत। *(केवलं पञ्चवाक्यम्)* (1 × 5 = 5 अङ्काः)

*(निम्नलिखित वाक्यों का संस्कृत भाषा में अनुवाद लिखिए।) (केवल पाँच वाक्य)*

*(i)* राम सिंह से डरता है।
Ram fears from the lion.

*(ii)* यह हमारा विद्यालय है।
This is our school.

*(iii)* सुरेश वृक्ष के नीचे सोता है।
Suresh sleeps under the tree.

*(iv)* गीता पाठ पढ़ो।
Geeta study the lesson.

*(v)* मैं गाँव जाऊँगा।
I will go to the village.

*(vi)* वह जाएगा।
He will go.

*(vii)* पिताजी प्रातःकाल घूमने जाते हैं।
Father goes to morning walk.

## पठित–अवबोधनम् (15 अङ्काः)

**15.** अधोलिखित गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (3 अङ्काः)

*(निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)*

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शवः प्रवारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्–मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि "त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः। अतः निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादंडं लप्स्यसे" इति।।
न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

I. एकपदेन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($\frac{1}{2}$ × 2 = 1 अङ्कः)

*(एक पद में उत्तर लिखिए।)(केवल दो प्रश्न)*

*(i)* पुनः न्यायाधीशेन कस्मिन् विषये वक्तुमादिष्टौ?
*(ii)* प्रवारकमपसार्य कः वदति?
*(iii)* आरक्षिणि किं प्रस्तुतवति?

II. पूर्णवाक्येन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* (1 × 2 = 2 अङ्काः)

*(पूर्णवाक्य में उत्तर लिखिए।) (केवल दो प्रश्न)*

*(i)* चौर्याभियोगे कति वर्षस्य दण्डं लप्स्यते?
*(ii)* न्यायाधीशः आरक्षिणे किं दण्डं आदिश्यति?
*(iii)* जनं केन ससम्मानं मुक्तवान्?

**16.** अधोलिखित पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (3 अङ्काः)

*(निम्नलिखित पद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)*

उदीरितोऽर्थः पशुनापि गृह्यते,
हयाश्च नागाश्च वहन्ति बोधिताः।
अनुक्तमप्यूहति पण्डितोजनः
पारेङ्गितज्ञनफला हि बुद्धयः।।

I. एकपदेन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($\frac{1}{2}$ × 2 = 1 अङ्कः)

*(एक पद में उत्तर लिखिए।) (केवल दो प्रश्न)*

*(i)* कः उदीरितः अर्थः गृह्यते?
*(ii)* अनुक्तम् अपि कः ऊहति?
*(iii)* नागाः कदा भारं वहन्ति?

II. पूर्णवाक्येन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* (1 × 2 = 2 अङ्काः)

*(पूर्णवाक्य में उत्तर लिखिए।)(केवल दो प्रश्न)*

*(i)* बोधिता के भारं वहन्ति?
*(ii)* बुद्धयः कीदृशः?
*(iii)* पारेङ्गितज्ञानफला का?

**17.** अधोलिखित नाट्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (3 अङ्काः)

*(निम्नलिखित नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)*

(एतत्सर्वं श्रुत्वा नदीमध्यस्थितः एकः बकः)

**बकः** अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति। अहं तु शीतले जले बहुकालपर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञ इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि, योजनां निर्माय च स्वसभायां विविधपदकमलंकुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यामि। अतः अहमेव वनराजपदप्राप्तये योग्यः।

**मयूरः** (वृक्षोपरितः–साट्टहासपूर्वकम्) विरम विरम आत्मश्लाघायाः। किं न जानसि यत्—
यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव।।
को न जानाति तव ध्यानावस्थाम्। 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। तव कारणात् तु सर्वं पक्षिकुलमेवावमानितं जातम्।

I एकपदेन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)*

($\frac{1}{2} \times 2 = 1$ अङ्कः)

*(एक पद में उत्तर लिखिए।) (केवल दो प्रश्न)*

(i) वराकान् मीनान् कः भक्षयति?

(ii) कः वृक्षोपरितः अट्टाहसम् करोति?

(iii) मयूरः विरम-विरम इति कस्मै कथयति?

II. पूर्णवाक्येन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)*

($1 \times 2 = 2$ अङ्काः)

*(पूर्णवाक्य में उत्तर लिखिए।) (केवल दो प्रश्न)*

(i) कस्य ध्यानावस्थाम् जनः जानाति?

(ii) बकस्य कारणात् कं अवमानितं जातम्?

(iii) धिक् त्वाम् इति कः कस्मै कथयति?

**18.** मञ्जूषायाः साहाय्येन श्लोकस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत।

($\frac{1}{2} \times 4 = 2$ अङ्काः)

*(मञ्जूषा की सहायता से श्लोक के अन्वय में रिक्तस्थानों की पूर्ति करके पुनः लिखिए।)*

प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टा।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा
मानवाय जीवनं कामये नो जीवन्मरणम्।।

**अन्वयः** (कविः कथयति यत्) लताः तरवः गुल्माश्च *(i)* ……… पिष्टाः न *(ii)* ………। पाषाणी *(iii)* ……… निसर्गे *(iv)* ……… न स्यात्।

(अहं) मानवाय जीवनं कामये, जीवन्मरणम् न।

[**मञ्जूषा** समाविष्टा, सभ्यता, प्रस्तरतलेः, भवन्तु।

***अथवा***

अधोलिखित श्लोकस्य भावार्थे मञ्जूषायाः उचितपदैः पूरयत। ($\frac{1}{2} \times 4 = 2$ अङ्काः)

*(निम्नलिखित श्लोक का भावार्थ मञ्जूषा के उचित शब्दों से पूरा कीजिए।)*

मृगा मृगैः सङ्गमनुव्रजन्ति, गावश्च गोभिः तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,समान-शील-व्यसनेषु सख्यम्।।

**भावार्थः** मैत्री सदैव *(i)* ……… भवति। यथा हि मृगाः मृगैः सह अनुगच्छन्ति, गावः *(ii)* ……… सह, अश्वाः *(iii)* ……… सह, मूर्खाः मूर्खैः सह तथा च विद्वांसः *(iv)* ……… सह अनुगच्छन्ति।

[**मञ्जूषा** विद्वद्‌भि, अश्वैः, गोभिः, समानशीलस्वभावेषु।

**19.** अधोलिखित कथांशं समुचितक्रमेण लिखत।

*(निम्नलिखित कथांश को उचित क्रम में लिखिए।)*

($\frac{1}{2} \times 8 = 4$ अङ्काः)

(i) सुरभे रिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्।

(ii) अयि शुभे! किमेवं रोदिषि? उच्चताम्।

(iii) भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः आश्रूणि आविसारन्।

(iv) क्रुद्धः कृषीवलः तमुत्थापथितुं बहुवारम् यत्नमकरोत्।

(v) सः वृषभः हलमूद्‌वा गन्तुमशक्तः क्षेत्रे पपात।

(vi) कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्ततः।

(vii) तयोः बलिवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्।

(viii) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।